# shrI hanUmat pa ncha chAmaram

# શ્રીહનૂમત્ પઞ્ચચામરમ્

## Document Information

Text title : hanumat pa.ncha chAmaraM

File name : hanumatpanchachamara.itx

Category : hanumaana

Location : doc_hanumaana

Transliterated by : N.Balasubramanian bbalu at satyam.net.in

Proofread by : N.Balasubramanian bbalu at satyam.net.in

Latest update : April 20, 2005

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીહનૂમત્ પઞ્ચચામરમ્

નમોઽસ્તુ તે હનૂમતે દયાવતે મનોગતે
    સુવર્ણપર્વતાકૃતે નભસ્સ્વતઃ સુતાય તે ।
ન ચાઞ્જનેય તે સમો જગત્ત્રયે મહામતે
    પરાક્રમે વચઃક્રમે સમસ્તસિદ્ધિસઙ્ક્રમે ॥ ૧॥

રવિં ગ્રસિષ્ણુરુત્પતન્ ફલેચ્છયા શિશુર્ભવાન્
    રવેર્ગૃહીતવાનહો સમસ્તવેદશાસ્ત્રકમ્ ।
ભવન્મનોજ્ઞભાષણં બભૂવ કર્ણભૂષણં
    રઘૂત્તમસ્ય માનસામ્બુજસ્ય પૂર્ણતોષણમ્ ॥ ૨॥

ધરાત્મજાપતિં ભવાન્ વિભાવયન્ જગત્પતિં
    જગામ રામદાસતાં સમસ્તલોકવિશ્રુતામ્ ।
વિલઙ્ઘ્ય વારિધિં જવાત્ વિલોક્ય દીનજાનકીં
    દશાનનસ્ય માનસં દદાહ લઙ્કયા સમમ્ ॥ ૩॥

વિલોક્ય માતરં કૃશાં દશાનનસ્ય તદ્વને
    ભવાનભાષત પ્રિયં મનોહરં ચ સંસ્કૃતમ્ ।
સમસ્તદુષ્ટરક્ષસાં વિનાશકાલસૂચનં
    ચકાર રાવણાગ્રતઃ નયેન વા ભયેન વા ॥ ૪॥

મહાબલો મહાચલં સમુહ્ય ચૌષધિપ્રભં
    ભવાન્ રરક્ષ લક્ષ્મણં ભયાવહે  મહાવહે ।
મહોપકારિણં તદા ભવન્તમાત્મબાન્ધવં
    સમસ્તલોકબાન્ધવોઽપ્યમન્યત સ્વયં વિભુઃ ॥ ૫॥

ભવાંશ્ચ યત્ર યત્ર તત્ શ◌ૃણોતિ રામકીર્તનં
    કરોતિ તત્ર તત્ર ભોઃ સભાષ્પમસ્તકાઞ્જલિમ્ ।
પ્રદેહિ મેઽઞ્જનાસુત ત્વદીયભક્તિવૈભવં
    વિદેહિ મે નિરઞ્જનં ચ રામદાસદાસતામ્ ॥ ૬॥

અગણ્યપુણ્યવાન્ ભવાન્ અનન્યધન્યજીવનઃ
　　વિમુચ્ય મૌક્તિકસ્રજં દદૌ ધરાત્મજા મુદા ।
ભવન્તમાલિલિઙ્ગ યદ્ રઘૂત્તમઃ સ્વયં વદન્
　　ઇદં હિ મે હનૂમતઃ પ્રદેયસર્વમિત્યહો ॥ ૭॥

વિદેહરાજનન્દિનીમનોહરે વરે પરે
　　વિદેહમુક્તિદાયકે વિધેહિ મે મનો હરે ।
ક્ષણં ક્ષણં નિરીક્ષણં ભવેદ્ યથા મયિ પ્રભોઃ
　　તથા　નિવેદયસ્વ મદ્દશાં દશાનનાન્તકે ॥ ૮॥

ઇદં ચ પઞ્ચચામરં ગૃહાણ દાસકલ્પિતં
　　સમીરણાત્મસમ્ભવ પ્રમોદમાનચેતસા ।
રિપૂન્ ષડાન્તરાન્ વિનાશયાશુ દુર્દમાન્
　　પુનર્ભવાખ્યકર્દમાત્ વિમુચ્ય પાહિ પાહિ મામ્ ॥ ૯॥

ઇતિ　શ્રીહનૂમત્ પઞ્ચચામરસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by N. Balasubramanian bbalu@satyam.net.in

*shrI hanUmat pa ncha chAmaram*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*